International Journal of Sanskrit Research 2020; 6(2): 93-97

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 93-97
© 2020 IJSR
www.anantaajournal.com
Received: 21-01-2019
Accepted: 23-02-2019

**Dr. N Venkatesha Rao**
Sathya Sai Institute of Higherlearning Brindavan Campus. Bangalore, Karnataka, India

**Corresponding Author:**
**Dr. N Venkatesha Rao**
Sathya Sai Institute of Higherlearning Brindavan Campus. Bangalore, Karnataka, India

# विद्याविनयसामरस्यम्

**Dr. N Venkatesha Rao**

## प्रस्तावना

इदानीन्तनदिनेषु सर्वेअपि विद्यासंपन्नाः। पदवीधराश्च। परं तु विद्यया उपकारः यदि सः आत्मोन्नत्यै यतते अथवा समाजमुखी भवति चेत्।तदर्थं विनयः अवश्यं अनुष्ठेयः। प्राचीनैः अनुसृतः विजयशालिभिः प्राप्तः विनयःविद्यार्थिभिरपि प्राप्य एव।एतदर्थं विद्याविनययोः सामरस्यं ज्येष्ठैः अनुसृत्य विद्यार्थिनां विधेयः। अयं लेखनस्य उद्देशः।

प्रायशः कलौ युगे सामरस्यम् न पश्यामः। सर्वत्र समरः एव संदृश्यते। न सामरस्यम्।ग्रामे ग्रामे संग्रामः, देशे देशे दुरन्तः, एवम् आभाणिका। कुतः इति प्रश्नः विवेकिनाम् मनसि समुदेति। यत्र अहमेव प्रधानः, मम समानः पुरुषः कोऽपि नास्तीति भावना समुद्भवति, तत्र सुतरां कलहः प्रादुर्भवति।अत एव जनप्रियतायै किं कारणम् ? इति प्रश्नः महाभारते पृष्टः।ईदृशप्रश्नस्य पाण्डवेषु कोऽपि उत्तरदाने न समर्थः।युधिष्ठिरः "किं नु हित्वा प्रियो भवति "? इति पृष्टे युधिष्टिरः "मानं हित्वा प्रियो भवति" इत्युत्तरमाह। यः मानं, तदतिरेकस्वरूपं अहंकारं त्यजति स तु प्रियो भवति। "स्मितपूर्वभाषी रामः" इति वदता वाल्मिकिना रामः अहंकारं त्यक्त्वा स्वयमेव भाषितुं प्रवृत्तिं चकारेति सूचितम्। संतोषं अनुभवितुं, मनसः प्रसन्नतायै अहंकारत्यागः आवश्यकः। तदर्थं, यदि विद्या वर्धते, तदा विनयः स्वयमेव आविर्भवति। तदर्थम् प्राचीनाः प्रोचुः" एवं श्लोकः गेगीयते सुभाषितमध्ये

''सम्पूर्णकुम्भो न करोति शब्दम् सार्धो घटो जल्पति साट्टहासम्।

सम्पूर्णः घटः शब्दम् न करोति।अल्पजलपूरितः घटः बहु शब्दम् करोतीति। अतः पूर्णविद्यया एव विनयः जायते।

विद्या ददाति विनयम् विनयात् याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनात् धर्मः ततः सुखम्।।

अस्माभिरधीता विद्या विनयम् न स्थापयति नाम, न सा विद्या।गुरुकुले समापितातध्ययनः श्वेतकेतुः यदा अहंकरयुक्तो भवति तदा पिता पुत्रं पुनरपि अध्ययनं कुरुष्वेति सन्नियम्य सन्मार्गे स्थापितवान्।विद्यया विनयःप्राप्तव्यः।

एका घटना मम मनसि सुस्थापिता। सा मम मनः पुनः पुनः क्षोभयति। बेलगाम् नगरमध्ये एका मध्यप्रमाणिका विमाननिस्थानम् (air port )अस्ति। तस्मिन्नेव नगरे सर्वकारीय शालायाम् मुख्योपाध्यायः कश्चन आसीत्।तस्य पुत्रः विज्ञाने पदवीम् प्रगृहय, विद्योन्नतिप्राप्तये विदेशम् जगाम। एतदाश्चर्यम् न। सर्वत्र साधारणम्। सः तत्र वसन्, विद्यायाम् परिणतिमपि प्राप्य, उद्योगमपि लब्ध्वा,धनं प्रतिष्ठां च प्राप्तवान्। कालान्तरे

स्वप्रदेशम् अवलोकितुम् बेळगाम् नगरम् आजगाम। मित्राणि बहु आसन् तस्य।ते सर्वे तत्र स्थित्वा तस्यागमनं बहुकालतः निरीक्ष्य, आगतं तम् द्रष्टुम् मिलितुं च प्रदद्रुवुः।

तस्य पिता तदानीं सर्वकारीय मुख्योपाध्यस्थानात् निवृत्तः। सः तं सुतं द्रष्टुं, अभिनन्दितुम् सोत्साहम् सवात्सल्यम् विमाननिस्था नं आजगाम।

पुत्रः विमानात् अवतीर्य, मित्राणाम् अभिनन्दनेन मोदमानः, तान् दृष्ट्वा सरसम् भाषति स्म। पिता तु तं दूरतः दृष्ट्वा, किंचित्कालं निरीक्ष्य किमपि नोक्त्वा तूष्णीम् गृहम् स्वयमेव निवृत्तः।

मित्राणि तं दृष्ट्वा, गतं पितरम् अपि समालोक्य मित्राय प्रावोचन्। तव पिता समागतः आसीत्, अस्मिन्नेव स्थले समुपविष्ठः आसीत् इति तत्स्थानमपि हस्तेन अंगुल्यग्रेण प्रदर्शयन् प्रवदन्ति स्म। इदानीम् सःक्व गतः इति न जानीमः इत्यप्यवदन्। स तु तत् सर्वम् श्रुत्वा, भवतु नाम इति मित्रमण्डल्याम् संभाष्य मित्रैः सह कार् वाहनेन (चतुश्चक्रयानेन) गृहम् प्राप।

तदनन्तरम घण्ठानन्तरम् पिता सार्वजनिकेन षट्चक्रयानेन गृहं आगतः। सर्वे मित्राणि प्रोचुः, भवान् कुत्र गतवान् ? तदनन्तरम् वयम् भवन्तम् तत्र न दृष्टवन्तः इति। स तु सखेदम् मनसः सन्तापं निगूहयन् सस्मितम् उवाच। मम पुत्रस्य मित्रसल्लापमग्नस्य संतोषः मम मध्यप्रवेशेन भग्नो न भवेत्, इति प्रतिनिवृत्तः। अहं मम मित्रेण सह सार्वजनिकवाहने प्रत्यागतवानस्मि, न कोऽपि क्लेशः मम संजातः-इति उत्तरम् दत्वा पत्रिकापठने मग्नो बभूव। सः पत्रिकापठणव्याजेन नेत्राश्रूणि न्यवारयत्। पिता तिष्ठतु वा गच्छतु, मम तु मित्राणि सन्ति। वृद्धम् पितरं न भाषे, मम सामाजिकस्थानस्य बाधः भवेत् इति भावयमानः पुत्रः क्व? सुतस्य संतोषः न नश्यतु इति, मन्दहासम् मुखे प्रदर्श्यमानः, सुतसंतोषार्थं स्वदुःखम् निगूहमानः पिता क्व? विद्या परसन्तोषं जनयेत्।

यदि विद्या विनयम् न स्थापयति तदा पदवीप्रमाणपत्रिका केवलम् पत्रस्य छिद्रा। तदर्थम् संवत्सरम् न यापनीयम्।विद्यया मानवः सुसंस्कृतः न भवति चेत् तदा सर्वम् व्यर्थम्।

छन्दोग्यपनिषत् विद्यया अहंकारयुतं श्वेतकेतुम एवमुल्लखति।

सह द्वादशवर्शं उपेत्य चतुर्विंशतिवर्शः सर्वान् वेदान् अधीत्य महामनाह अनूनमानी

स्तब्ध एवाय।सगं पितोवाच।---अनूनमानी स्तब्धोऽसि (छा,उ,6-1-3)

पिता तं पुनः अधीहीति भर्त्सयित्वा आत्मज्ञनिनं चकार।तेन सः विद्याविनयसंपन्नो बभूव।यद्यधीता विद्या विनयं न स्थापयति तदा सा नैव विद्या।विश्वामित्रेण प्राप्तधनुर्विद्याकौशलः रामःस्पर्धार्थं शिवधनुषः पुरः स्थापितः।धनुर्भंगाय प्रारभस्व इति गुरुरादिदेश।रामास्तु एवमाह।एतदर्थं हि रामायणं सार्वकालीनं भवति।रामो ब्रवीति; “यत्नवांश्चश्च भविष्यामि”-इति।

इदं धनुर्वरं ब्रह्मन् संस्पृशामीह पणिना।

यत्नवाश्च भविष्यामि तोलने पूरणेऽपि वा।।(वा।रा।1-66-14)

एतेन वाक्येन विश्वामित्रः विद्या फलिता शिष्ये इति तुतोष।विद्यावृक्षः विनयफलकः।

कविकुलगुरुः कालिदासः स्वीये महाकाव्ये रघुवंशवर्णनावसरे एवमाह।

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुः दुस्तरं मोहात् उडुपेनास्मि सागरम्।।(रघु।वं।1-2)

सूर्यारब्धः रघुवंशः कुत्रास्ति? अतीवोन्नतस्थाने सः विराजते।अल्पविषयिका मम बुद्धिः क्व ? यथा अल्पेन दुर्बलेन नदीतरणसाधनेन, महासागरं तर्तुम् बालः प्रयतते, एवम् कृत्वा अपहास्यविषयो भविष्यति, तथा अल्पबुद्धिरहम् रघुवंशविवरणे समुत्सुकः भूत्वा हास्यास्पदः भविष्यामि इति जानामि।तथापि प्रयत्नं करोमि इति प्रतिवदति। एतादृशविनयः कालिदासे आसीत्।

रघुवंशव्याख्याकरः मल्लिनाथसूरिः स्वीये व्याख्यादौ एवं वक्ति

कालिदसगिरां सारं कालिदासः सरस्वती
चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु मादृशाः(संजीविनीव्याख्या-पीठिका-6,श्लोकः)

कालिदकृतेः व्याख्यानयोग्यता नास्ति मयि।कविवरः कालिदासः तत्र शक्तः, तदन्तरम् विद्यभिमानिनी सरस्वती तत्र साहसं कुर्यात्, अथवा सृष्टिकर्ता चतुर्वदनः चतुदिक्षुप्रसारितर्दृष्ट्या ग्रन्थं दृष्ट्वा व्याख्यां कुर्यात, अल्पामतिरहम् कथं व्याख्याने प्रभवामि, इति विनयं प्रकटयति।"विद्या विनयेन शोभते" इत्यस्य इतोप्यधिकमवश्यकम् किम् ?

महाकाव्यकर्ता मध्वविजयरचयिता नारायणपण्डिताचार्यः काव्यारम्भे सविनयं एवं उद्घोषयति।

मालाकृतः तच्चरिताख्यरत्नैरसूक्ष्मदृष्टेः सकुतूहलस्य।
पूर्वारीकारमथापरम् वा क्षाम्यन्तु मे हन्त मुहुर्महान्तः।(मध्वविजयः-1-8)

यथा मूढः मणीनां अपरिज्ञानात् मणिग्रथनकुतूहलात् यथामति यथाकथंचित्, संबद्दम् असंबद्धम् वा ग्रथयति, तं जनाः विक्रयन्तु इति प्रचुरं प्रचारमपि करोति, तथापि मणिमौल्यवेत्ता तत्रस्थम् परप्राप्तन्यूनतां न्यकृत्य मणिमौल्यगौरवात् मणिमालां क्रयं दत्वा क्रीणाति,एवं मम काव्ये पूर्वं वक्तव्यम् अनन्तरं भवेत्, अनन्तरवचनीयम् पूर्वमुक्तं भवेत्, एवं कृतेऽपि महामुनिमध्वमहिमाविदः सज्जनाः मम लोपदोषम् न गणयन्तु। तत्र विद्यमानान् गुणान् स्वीकुर्वन्तु इति। एवम् विनयः आवश्यकः। "विनयो हि भूषयति सर्व रसम्" इति कविवाक्यम् सर्वं विनयभावनया विशेषतः शोभते- इति सूचयति।

द्वैतसिद्धान्तस्य मेरुकृतिः श्रीमन्न्यायसुधा इति विश्रुतम् विद्वत्कुले।ग्रन्थकारस्तु तु षढंगपरिणतः, षट् शास्त्रप्रवीणपारावारः इति प्रसिद्धः।तथाऽपि तस्य प्रस्तावना एवमस्ति-

न शब्दाब्धौ गाढा न च निगमचर्चासु चतुराः
न च न्याये प्रौढा न च विदितवेद्या अपि वयम्।
परं श्रीमत्पूर्णगुरुकारुण्यसरणिं प्रपन्ना
मान्याः स्मः किमपि च वदन्तोऽपि महताम्।।(श्रीमन्न्यायसुधा-पीठिका-8)

नाहं व्याकरणे विद्वान्, मीमांसादियुते निगमविषये निपुणश्च न।न्यायशास्त्रे प्रौढेति नाहं भावितवान्।यद्वेद्यं तदपि मया न विदितम्।परं तु गुरुकरुणाप्रवाहमग्नचित्तोऽहम्,यत्किचित् वदन्नपि पूज्यतां प्राप्तवानस्मि,इति वदति।लिखति चादौ,समानार्थकं समापनेऽपि समुल्लिखति।

न्यायसुधा विषये त्रिंशदधिकव्यख्यानानि सन्ति।ते सर्वे व्याख्याकाराः षट् शास्त्रप्रवीणाः।तादृशमूलकृतिकारः एतादृशं विनयं समुल्लिखति ग्रन्थादौ।यदि विद्वद्वरेण्ये तस्मिन् विनयो विद्यते,कुतो विद्यार्थिनाम् सा नास्ति? ईदृशः विनयः विद्यार्थिनां विशेषतः आवश्यकः।

कविराजः वादिराजयतिः शतादप्यधिकसंख्याकान् ग्रन्थान् रचयमास। तत्र स्वकीय महाकाव्ये रुक्मिणीश विजये एवमाह।

अपि
प्रमादागतदोषलेशामिमाम् कवित्वश्रियमाद्रियध्वम्।

अकौशलेन ग्रथितेति सद्यो प्रसूनमालां किमु सन्त्यजन्ति।
अपण्डितेनापि मयार्जितेयं मुकुन्दलीला कविकण्ठमाला।।
बुधा विदग्धैः किमुपेक्षणीया पयोब्धिजा चंचलताख्यदोषात्। (रु।वि 1-9,10)
अहं न पण्डितः, तथापि इमाम् काव्यमालाम् कण्ठे धारयन्तु। मम काव्ये दोषाः भवेयुः। यथा सर्वसुखजनन्याम् सर्वसंपत्प्रदयिन्याम् लक्ष्म्यां चंचलतारूपदोषः अस्ति। सा कुत्रापि दीर्घकालं नैव तिष्ठति इति। तथापि तद्दोषं न्यगण्य लक्ष्मीं सर्वे आद्रियन्ते। एवं मम काव्यदोषम् अन्यतः निक्षिप्य गुणान् कटाक्षीकुर्वन्तु इति विनयम् उररीचकार।
जीवने विद्या भवतु तदन्तरम् तया साकम् विनयः भवतु।
विद्या ददाति विनयं विनयात् याति पात्रताम्।
विनयः पात्रताम् दत्वा तम् जगद्गुरुमिति प्रसिद्धिमपि प्रदापयामास।
गुरुरितिपूज्यमानाः राघवेन्द्रस्वामिनः स्वीयें परिमळव्याख्यासमापनसमये एवमाहुः।
ज्ञानाब्धिरप्यवादीत् यत् स्खलत्वमात्मनः सदा।
मादृशानाम् स्खलत्वं किं वाच्यं क्षाम्यन्तु मे बुधाः।। परिमळ-4-4।अन्तिमवाक्यम्)
महद्विद्यासागरतरणतज्ञाः मेधाविनः पुरुषाः अपि स्वीये कृतौ दोषसंभावनाम् उपगम्य भीताः भवन्ति। एवं सति मम कृतौ दोषा भवेयुरेव।तत्वविदः क्षाम्यन्तु इति प्रार्थयन्ते।
अतः इदम् मननीयम्।
एवम् विद्यया भवति विनयः, विनयेन पात्रता।पात्रत्वात् धनम्, धनात् धर्मः ततः सुखम्।
एवम् पूर्वजाः प्रवदन्ति। अतः तेषां आशीर्वादः एवम् आसीत्।
“विजयी भव- विनयी भव” इति।
यदा सर्वा विद्या धनार्थं, तदा सर्वम् दुःखमयम् भविष्यति। विद्या धनाय इति प्रवृत्तिः तत्र कारणम्। धनेन प्रतिष्ठा इति चिन्तनम्।विद्यया विनयं प्राप्य तेन पात्रतां लब्ध्वा धनेन धर्ममाचरन्तु।तदा कीर्तिः, परलोकः, सुखं च लभते।
वादिराजकृतयुक्तिमल्लिकायाः व्याख्याकारः सुरोत्तमयतिः तत्काव्यस्य 5379 श्लोकान् व्याख्याय स्वयं व्याख्याय मत्काव्यं वादिराजो बुधाग्रणीः
मन्नाम ख्यापयामास सन्तो ह्याश्रितवत्सलाः इति वक्ति।
महाकाव्यरुक्मिणीशविजयाव्याख्याकाकरः नारायाणाचर्यःग्रन्थस्थ (1241) श्लोकान् व्याख्याय तदन्ते सविनयं एवं वक्ति।
न शब्दशस्त्रप्रावीण्यं नालंकारनये तथा।
केवलं गुरुकारुण्याट्टीकेयं लिखिता मया।।(सु-व्या-फलसौरभान्तिमश्लोकसमापने-)
अत एव प्रोक्तम् “विनयो हि भूषयति सर्वरसम्” (म।वि। थॅ

भगवद्गीतायां कृष्णो वचनमाह-
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।(भ।5-18)
विद्याविनयसंपन्ने भगवान् दृश्यते,नाम विद्यायाः विनयः सहवर्ती खलु।
अत एव कृष्णः प्राह “विद्याविनयसंपन्ने” इति।तेन समाजस्य प्रगतिः, आत्मोद्धारश्च भवति।

**ग्रन्थसूची**


1. नारायणपण्डिताचार्यः- सुमध्वविजयः - संपादकःव्यासनकेरे प्रभंजनः-प्रथम मुद्रणम् प्रकाशकः-मध्वसिद्धन्तोन्नाहिनि सभा तिरुच्चानूरु-1989।
2. मूलग्रन्थकारः वादिराजयतिः- रुक्मिणीशविजयः -कन्नडानुवादः-भीमसेनाचार्य-प्रकाशनम् माध्वग्रन्थप्रकाशनम् -धारवाड-1990
3. वादिराजकृतेः नारायणाचार्यकृतव्याख्या-रुक्मिणिशविजयव्याख्यासहितम् - व्यासनकेरे प्रभंजनः-प्रथमप्रकशनम् -मध्वसिद्धन्तोन्नाहिनी सभा तिरुच्चानूरु 1996

4. कालिदासकृत रघुवंशम्-सन्जीविनीव्याख्यासहितम्, आन्ग्लानुवादयुतम् सं -एम, आर् नन्दर्गिकर, पंचममुद्रणम्, प्रकाशनम्, मोतीलाल् बनारसि दास्, वारणासि-1982
5. श्रीमन्न्यायसुधा-जयतीर्थयतिः-षड्व्याख्यानोपेतम् -प्रकाशनम्, विद्वन्मडली- उत्तरादिमठः बेगळूरु-1982
6. वदिराजयतिः-युक्तिमल्लिका(व्याख्यानसहितम्)-संपादकः-के।टि। पाण्डुरंगि, प्रकाशनम् द्वैतवेदान्तफौण्डेषन् बेंगळूरु 2008
7. भगवद्गीता-गीताप्रेस्, गोरखपुर्-2010
8. वाल्मीकिरामायणम्; original with English translation by Ravi prakash arya,.Parimala publications-Delhi2004
9. Selections from Upanishads, editor- Anantarangachar-Sri Rama printers Bengaluru 2002,